श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ चतुर्थः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्थः सर्गः ॥

## वाल्मीकिश्चतुर्विंशतिसहस्रश्लोकयुतं रामायणं काव्यं निर्माय कुशीलवौ तदध्यापयत्, तयो रामायणगानं श्रुत्वा मुनिभिः प्रशंसनमयोध्यायां श्रीरामेण सम्मानिताभ्यां ताभ्यां तदीयराजसभायां रामायणगानश्रावणम्

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत्॥ **1.4.1** ॥

चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः।
तथा सर्गशतान् पञ्च षट्काण्डानि तथोत्तरम्॥ **1.4.2** ॥

कृत्वा तु तन्महाप्राज्ञः सभविष्यं सहोत्तरम्।
चिन्तयामास को न्वेतत् प्रयुञ्जीयादिति प्रभुः॥ **1.4.3** ॥

तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः।
अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ॥ **1.4.4** ॥

कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ।
भ्रातरौ स्वरसम्पन्नौ ददर्शाश्रमवासिनौ॥ **1.4.5** ॥

स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥ **1.4.6** ॥

काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्यवधमित्येवं चकार चरितव्रतः॥ **1.4.7** ॥

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्।
जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम्॥ **1.4.8** ॥

रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः।
वीरादिभी रसैर्युक्तं काव्यमेतदगायताम्॥ **1.4.9** ॥

तौ तु गान्धर्वतत्त्वज्ञौ स्थानमूर्च्छनकोविदौ।
भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ॥ **1.4.10** ॥

रूपलक्षणसम्पन्नौ मधुरस्वरभाषिणौ।
बिम्बादिवोत्थितौ बिम्बौ रामदेहात् तथापरौ॥ **1.4.11** ॥

तौ राजपुत्रौ कात्स्न्र्येन धर्म्यमाख्यानमुत्तमम्।
वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ॥ **1.4.12** ॥

ऋषीणां च द्विजातीनां साधूनां च समागमे।
यथोपदेशं तत्त्वज्ञौ जगतुः सुसमाहितौ॥ **1.4.13** ॥

महात्मानौ महाभागौ सर्वलक्षणलक्षितौ।
तौ कदाचित् समेतानामृषीणां भावितात्मनाम्॥ **1.4.14** ॥

मध्ये सभं समीपस्थाविदं काव्यमगायताम्।
तच्छ्रुत्वा मुनयः सर्वे बाष्पपर्याकुलेक्षणाः॥ **1.4.15** ॥

साधु साध्विति तावूचुः परं विस्मयमागताः।
ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः॥ **1.4.16** ॥

प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ।
अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः॥ **1.4.17** ॥

चिरनिर्वृत्तमप्येतत् प्रत्यक्षमिव दर्शितम्।
प्रविश्य तावुभौ सुष्ठु तथाभावमगायताम्॥ **1.4.18** ॥

सहितौ मधुरं रक्तं सम्पन्नं स्वरसम्पदा।
एवं प्रशस्यमानौ तौ तपः श्लाघ्यैर्महर्षिभिः॥ **1.4.19**॥

संरक्ततरमत्यर्थं मधुरं तावगायताम्।
प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ॥ **1.4.20**॥

प्रसन्नो वल्कलं कश्चिद् ददौ ताभ्यां महायशाः।
अन्यः कृष्णाजिनमदाद् यज्ञसूत्रं तथापरः॥ **1.4.21**॥

कश्चित् कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः।
बृसीमन्यस्तदा प्रादात् कौपीनमपरो मुनिः॥ **1.4.22**॥

ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः।
काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः॥ **1.4.23**॥

जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदान्वितः।
यज्ञभाण्डमृषिः कश्चित् काष्ठभारं तथापरः॥ **1.4.24**॥

औदुम्बरीं बृसीमन्यः स्वस्ति केचित् तदावदन्।
आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः॥ **1.4.25**॥

ददुश्चैवं वरान् सर्वे मुनयः सत्यवादिनः।
आश्चर्यमिदमाख्यानं मुनिना सम्प्रकीर्तितम्॥ **1.4.26**॥

परं कवीनामाधारं समाप्तं च यथाक्रमम्।
अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ॥ **1.4.27**॥

आयुष्यं पुष्टिजननं सर्वश्रुतिमनोहरम्।
प्रशस्यमानौ सर्वत्र कदाचित् तत्र गायकौ॥ **1.4.28**॥

रथ्यासु राजमार्गेषु ददर्श भरताग्रजः।
स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ॥ **1.4.29**॥

पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः।
आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ॥ **1.4.30** ॥

उपोपविष्टैः सचिवैर्भ्रातृभिश्च समन्वितः।
दृष्ट्वा तु रूपसम्पन्नौ विनीतौ भ्रातरावुभौ ॥ **1.4.31** ॥

उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा।
श्रूयतामेतदाख्यानमनयोर्देववर्चसोः ॥ **1.4.32** ॥

विचित्रार्थपदं सम्यग्गायकौ समचोदयत्।
तौ चापि मधुरं रक्तं स्वचित्तायतनिःस्वनम् ॥ **1.4.33** ॥

तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायताम्।
ह्लादयत् सर्वगात्राणि मनांसि हृदयानि च।
श्रोत्राश्रयसुखं गेयं तद् बभौ जनसंसदि ॥ **1.4.34** ॥

इमौ मुनी पार्थिवलक्षणान्वितौ
कुशीलवौ चैव महातपस्विनौ।
ममापि तद् भूतिकरं प्रचक्षते
महानुभावं चरितं निबोधत ॥ **1.4.35** ॥

ततस्तु तौ रामवचःप्रचोदिता -
वगायतां मार्गविधानसम्पदा।
स चापि रामः परिषद्गतः शनैः
बुभूषयासक्तमना बभूव ह ॥ **1.4.36** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्थः सर्गः ॥